# Shrikrishna Purushottama Siddhanta Upanishad

# श्रीकृष्णपुरुषोत्तमसिद्धान्तोपनिषत्

## Document Information

Text title : kRRiShNapuruShottamasiddhAntopaniShat

File name : kRRiShNapuruShottamasiddhAntopaniShat.itx

Category : upanishhat, vishhnu, upanishad, krishna

Location : doc_upanishhat

Proofread by : Kasturi navya sahiti kasturinsahiti at gmail.com

Description-comments : aprakAshitA upaniShadaH

Latest update : March 20, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 20, 2020

*sanskritdocuments.org*

# श्रीकृष्णपुरुषोत्तमसिद्धान्तोपनिषत्

निरञ्जनो निराख्यातो निर्विकल्पो नमो नमः ।
पूर्णानन्दो हरिर्मायारहित पुरुषोत्तमः ॥

अष्टावष्टसहस्रे द्वे स्त्रियो जायन्ते पुरुषोत्तमात् । स्मृतिर्जायते पुरुषोत्तमात् । षट्च्छास्त्राणि जायन्ते पुरुषोत्तमात् । छन्दो जायते पुरुषोत्तमात् । निगमो जायते पुरुषोत्तमात् । प्रजापतिर्जायते पुरुषोत्तमात् । शशिरवी जायेते पुरुषोत्तमात् । सकलतीर्थानि जायन्ते पुरुषोत्तमात् । परशिवशक्तिर्जायते पुरुषोत्तमात् । ऋषयोऽनृषयो जायन्ते पुरुषोत्तमात् । इन्द्रो जायते पुरुषोत्तमात् । द्वादशादित्या रुद्राः सर्वा देवता ज्जयन्ते पुरुषोत्तमात् । देवा जायन्ते पुरुषोत्तमात् । सप्त सागरा जायन्ते पुरुषोत्तमात् । सर्व आत्मा जायते पुरुषोत्तमात् । मनःसर्वेन्द्रियाणि जायन्ते पुरुषोत्तमात् । अष्टादश ब्रह्माण्डानि जायन्ते पुरुषोत्तमात् । अष्टसिद्धिनवनिधयो जायन्ते पुरुषोत्तमात् । वनभारा अष्टादश जायन्ते पुरुषोत्तमात् । अमृतो जायते पुरुषोत्तमात् । अम्भो जायते पुरुषोत्तमात् ॥

ॐ निगमं शङ्करोऽब्रवीत् । गौः । ग्मा । ज्मा । क्ष्मा । क्षा । क्षमा । क्षोणिः । क्षितिः । अवनिः । उर्वी । पृथ्वी । मही । रिपः । अदितिः । इला । जीवामकालाशूता (९) “जीवामकालाशूता जीवः” इत्यारभ्य “पुष्प एवेदं सर्वम्” इत्येतत्पर्यन्तं अतीव विकला मातृकेति
सानुतापं यथास्थितं दीयते ऽ
जीवः जीवा अस्ताजीव्यामं सर्वमायुजीव्याप्तं (?) ।
लोदङ्कश्चनङ्कांश्चानु अमृतं न भवति (?) पारमधाराणि (परमधर्माणि) जातवेदाः प्रोवाचैवेदं सर्वम् । शिवशक्तिपशुजीवो ब्रह्मा भक्तः पशुवत् (?) । यन्नत्यादेव परं श्रत्को परशिवः अन्या अवतारातेहि व्यासवल्लश्रविठलेहरयस्तथा (?) । ललाटे ऊर्ध्वपुण्ड्रं मध्यच्छिद्रं चन्दनतिलकं शुभं हरिमन्दिरं मध्यपद्मं

कण्ठेतुलसी शङ्खचक्रं गदा बाहुगोपीचन्दनचर्चनं परं
गतिः जीवोत्तमस्य । ब्रह्मा शक्तिर्महादेवो जन्यते पुरुषोत्तमात् ।
ॐ आपोऽमृतमर्त्यस्य मर्त्योऽपश्यत् यस्तु जन्यते पुरुषोत्तमात् ।
अमृतात् प्राणाश्चाहो मम जायन्ते पुरुषोत्तमात् । मनसि निषण्णः श्रीप्राणाय
प्रज्ञानाय स्वराट् पुरुषोत्तमः । श्रीकृष्णभगवान् नारायणः परमात्मा
पुरुषोत्तमः त्रिगुणरहितः स्वयम् । कथम्? पुरुष एवेदं सर्वम् ॥

(वैष्णव-उपनिषदः)

इति श्रीकृष्णपुरुषोत्तमसिद्धान्तोपनिषत् समाप्ता ।

Proofread by Kasturi navya sahiti

---

*Shrikrishna Purushottama Siddhanta Upanishad*

pdf was typeset on March 20, 2020

Please send corrections to *sanskrit@cheerful.com*